श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री अनन्ताळ्वान् विरचित

# ॥ श्रीगोदाचतुःश्लोकी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीगोदाचतुःश्लोकी ॥

नित्या भूषा निगमशिरसां निस्समोत्तुङ्गवार्ता
कान्तो यस्याः कचविलुलितैः कामुको माल्यरत्नैः।
सूक्त्या यस्याः श्रुतिसुभगया सुप्रभाता धरित्री
सैषा देवी सकल जननी सिञ्चतां मामपाङ्गैः॥ १ ॥

माता चेत्तुलसी पिता यदि तव श्रीविष्णुचित्तो महान्
भ्राता चेद्यतिशेखरः प्रियतमः श्रीरङ्गधामा यदि।
ज्ञातारस्तनयाः त्वदुक्तिसरसस्तन्येन संवर्धिताः
गोदा देवि ! कथं त्वमन्यसुलभा साधारणा श्रीरसि॥ २ ॥

कल्पादौ हरिणा स्वयं जनहितं दृष्ट्वैव सर्वात्मनां
प्रोक्तं स्वस्य च कीर्तनं प्रपदनं स्वस्मै प्रसूनार्पणम्।
सर्वेषां प्रकटं विधातुमनिशं श्रीधन्विनव्ये पुरे
जातां वैदिकविष्णुचित्ततनयां गोदामुदारां स्तुमः॥ ३ ॥

आकूतस्य परिष्क्रियामनुपमामासेचनं चक्षुषोः
आनन्दस्य परंपरामनुगुणामारामशैलेशितुः।
तद्दोर्मध्य किरीटकोटिघटित स्वोच्छिष्ट कस्तूरिका
माल्यामोदसमेधितात्मविभवां गोदामुदारां स्तुमः॥ ४ ॥

स्वोच्छिष्टमालिकाबन्ध गन्धबन्धुरजिष्णवे।
विष्णुचित्ततनूजायै गोदायै नित्यमङ्गळम्॥ ५ ॥

मादृशाकिञ्चनत्राण बद्धकङ्कण पाणये।
विष्णुचित्ततनूजायै गोदायै नित्यमङ्गळम्॥ ६ ॥

श्रीमत्यै विष्णुचित्तार्य मनोनन्दनहेतवे।
नन्दनन्दन सुन्दर्यै गोदायै नित्यमङ्गळम्॥ ७ ॥

कर्कटे पूर्वफल्गुन्यां तुलसीकाननोद्भवाम्।
पाण्ड्ये विश्वम्भरां गोदां वन्दे श्रीरङ्गनायकीम्॥ ८ ॥

॥ इति श्रीगोदाचतुःश्लोकी समाप्ता ॥

www.prapatti.com